श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ रेखापद्धतिः सप्तविंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ रेखापद्धतिः सप्तविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सूचयन्तीं स्वरेखाभिः अनालेख्यसरस्वतीम्।
अलेखनीयसौन्दर्याम् आश्रये शौरिपादुकाम्॥ **27.1** ॥

मणिमौळिनिघर्षणात् सुराणां वहसे काञ्चनपादुके ! विचित्रम्।
कमलापतिपादपद्मयोगात् अपरं लक्षणमाधिराज्यसारम्॥ **27.2** ॥

अभितो मणिपादुके ! स्फुरन्त्याः
तव रेखाविततेस्तथाविधायाः।
मुरवैरिपदारविन्दरूढैः
अनुकल्पायितमाधिराज्यचिह्नैः॥ **27.3** ॥

रेखया विनमतां दिवौकसां
मौळिरत्नमकरीमुखोत्थया।
पादुके ! वहसि नूनमद्भुतं
शौरिपादपरिभोगलक्षणम्॥ **27.4** ॥

त्रिदशमकुटरत्नोल्लेखरेखापदेशात्
परिणमयसि पुंसां पादुके ! मूर्ध्नि लग्ना।
नरकमथनसेवासम्पदं साधयित्री
नियतिविलिखितानां निष्कृतिं दुर्लिपीनाम्॥ **27.5** ॥

पदकमलतलान्तः संश्रितान्यातपत्र -
ध्वजसरसिजमुख्यान्यैश्वरीलक्षणानि।
अवगमयसि शौरेः पादुके ! मादृशानाम्
उपरि परिणतैः स्वैर्देवि ! रेखाविशेषैः॥ **27.6** ॥

स्नाता पदावनि चिरं परिभुज्य मुक्ता
पादेन रङ्गनृपतेः शुभलक्षणेन।
रेखान्तरैर्नवनवैरुपशोभसे त्वं
संस्कारचन्दनविलेपनपङ्कलग्नैः॥ **27.7** ॥

भक्त्या मुहुः प्रणमतां त्रिदशेश्वराणां
कोटीरकोटिकषणादुपजायमानैः।
आभाति शौरिचरणादधिकानुभावा
रेखाशतैस्तव पदावनि ! काऽपि रेखा॥ **27.8** ॥

पादावनि ! प्रतिपदं परमस्य पुंसः
पादारविन्दपरिभोगविशेषयोग्या।
स्वाभाविकान् सुभगभक्तिविशेषदृश्यान्
रेखात्मकान् वहसि पत्रलताविशेषान्॥ **27.9** ॥

रेखापदेशतस्त्वं प्रशमयितुं प्रळयविप्लवाशङ्काम्।
वहसि मधुजित्पदावनि ! मन्ये निगमस्य मातृकालेख्यम्॥ **27.10** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे रेखापद्धतिः सप्तविंशी॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥